Gyanshauryam, International Scientific Refereed Research Journal
© 2022 GISRRJ | Volume 5 | Issue 6 | ISSN : 2582-0095

# प्राचीनभारतीयविज्ञाने आयुर्वेदः

ड. निवेदिताकर
अध्यापिका, शिक्षाशास्त्रविभागः, श्रीजगन्नाथसंस्कृतविश्वविद्यालयः, पुरी।

**Article Info**
Volume 5, Issue 5
Page Number : 133-137

**Publication Issue :**
September-October-2022

**Article History**
Accepted : 01 Sep 2022
Published : 15 Sep 2022

**शोधसारः**- सम्पूर्ण विश्वस्य प्राचीनतमा चित्किसाप्रणाली। अस्य सम्बन्धः मानवशरीरस्य निरोगीकरणम्, रूग्णजनानां शमनम्, आयुवर्द्धनस्य उपायेन साकं वर्त्तते। अतः उक्तम् - आयुर्वेदयति बोधयति इति आयुर्वेदः। ऋग्वेदसंहितायां आयुर्वेदस्य सिद्धान्ताः वर्णिताः। अर्थववेदस्य उपवेदः। अस्य रचनाकालः पूर्व 3000 तः 5000 पर्यन्तं मन्यते। आयुर्वेदिकचिकित्साविधिः सर्वोत्कृष्टः भवति। अनेन मानवस्य शारीरिक-मानसिकस्थितिषु सुधारः जायते। पुनश्च अत्र आयुर्वेदीयचिकित्सायाः दुष्प्रभावः नास्ति। आयुर्वेदे तीक्ष्ण-तृषा-तन्द्रा-निदान-अग्नि-पञ्चकर्म-पञ्चमूलधातु-वातकारक-पथ्य-वाजीकरण-शमन-हेतु-त्रिदोष-त्रिगुणादिपदानां प्रयोगः बहुलतया जायते। एवंरूपेण न केवल आर्युवेदीयग्रन्थेषु अपितु सम्पूर्णे संस्कृतसाहित्ये करणीय-अकरणीयकार्याणां विवरणमस्ति। भारतीयसंस्कृतौ सदाचारः धर्मेण स्वास्थ्येन साकं सम्बन्धितः। अतः शारीरिक-मानसिकरूपेण च स्वस्थजीवनं यापयितुं शास्त्रोक्तनियमानाम् अनुपालनं करणीयम्।

मुख्यशब्दाः - उपवेदः, धर्मग्रन्थाः, आयुर्वेदः, दुष्प्रभावः, आयुः, प्राचीनभारतीयविज्ञानः।

सर्वे प्राचीनग्रन्थाः चत्वारो वेदाश्च संस्कृतभाषायामेव रचितम्। अस्य सुस्पष्टं व्याकरणं वर्णमालायाः वैज्ञानिकता च विश्वविदितम्। संस्कृतं विश्वस्य सर्वाधिकरूपेण पूर्णं तर्कसम्मतञ्च भाषा एव । संस्कृतभाषासाहित्ये रचना प्रायः षट्सहस्रवर्षादारभ्य अद्यावधि निरन्तरतया चलति। भारतस्य समस्तमपि प्राचीनवाङ्मयं संस्कृतभाषामाश्रित्यैव वर्त्तते। सम्पूर्ण वैदिकवाङ्मयं, रामायणं, महाभारतं, पुराणानि, स्मृतिग्रन्थाः, दर्शनानि (न्याय-वैशिषिक-वेदान्त-सांख्य-योग-मींमासा), धर्मग्रन्थाः, महाकाव्यानि, काव्यानि, नाटकानि,गीतिकाव्यानि, आख्यानसाहित्यं, नीतिग्रन्थादीनां मूलरूपं संस्कृतभाषायामेव उपलभ्यते। एतानि सर्वाणि भारतीयपरम्परायाः परिचयं प्रकाशयन्ति। उक्तञ्च ईशोपनिषदि -

**विद्या चाविद्यां च यस्तद्वेदोभयं सह**
**अविद्यया मृत्युं तीर्त्वा विद्ययामृतमश्नुते ।।**

विष्णुपुराणे अष्टादशविद्याविषये चर्च्चा विहिता। यथा -

**अङ्गानि चतुरो वेदाः मींमासा न्यायविस्तरः**
**पुराणं धर्मशास्त्रञ्च विद्याः हि एताः चतुर्दशाः ।।28।।**

**Copyright:** © the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

**आयुर्वेदो धर्नुवेदो गान्धर्वश्चैव ते त्रय:**

**अर्थशास्त्रं चतुर्थन्तु विद्या हि अष्टादशैव ।।29।।**

अर्थात् –

- षडङ्गानि - शिक्षा, कल्प:, व्याकरणम्, निरूक्तम्,ज्योतिष:, छन्द:,
- चत्वारोवेदा: - ऋक्-साम-यज्जु-अथर्व
- मींमासा
- न्याय:
- पुराणम्
- धर्मशास्त्रम्
- आयुर्वेद:
- धनुर्वेद:
- गान्धर्ववेंद:
- अर्थशास्त्रम् इति अष्टादशविद्या:

प्राचीनकले बहूनां विषयाणामध्ययनं क्रियते स्म। एतेषु आयुर्वेद: अथर्ववेदस्य शाखा, वेदस्य स्रोतरूपेण च स्वीक्रियते। अस्य सूचना वैदिकमन्त्रेषु प्राप्यते। यथा -

**भिषक्तमं त्वां भिषजा शृणोमि ।** ऋकवेद:

**प्रथमो दैव्यों भिषक्** । यजुर्वेद:

सम्पूर्ण विश्वस्य प्राचीनतमा चित्किसाप्रणाली । अस्य सम्बन्ध: मानवशरीरस्य निरोगीकरणम्, रूग्णजनानां शमनम्, आयुवर्द्धनस्य उपायेन साकं वर्त्तते। अत: उक्तम् - आयुर्वेदयति बोधयति इति आयुर्वेद: । ऋग्वेदसंहितायां आयुर्वेदस्य सिद्धान्ता: वर्णिता: । अर्थववेदस्य उपवेद: । अस्य रचनाकाल: पूर्व 3000 त: 5000 पर्यन्तं मन्यते। आयु: वेद इति पदयो: मेलनेन आयुर्वेद:, यत्र आयु: जीवनं, वेद: विज्ञानमिति अर्थं द्योतयति। प्राचीनव्याख्यानुसारम् आयु इति शरीर-इन्द्रिय-मन-आत्मन: संयोगरूपम्। वेद: सत्ता-लाभ-गति-विचार-प्राप्ति-ज्ञानसाधनोपायार्थक: । पुनश्च आयुर्वेद: त्रिस्कन्ध: इत्यपि कथ्यते यत्र हेतु-लिङ्ग-औषधमिति त्रीणि सूत्राणि सन्ति। अत: आङ्गलभाषायां Knowledge of Science and Life इत्युच्यते। अत्र शरीर-मन-इन्द्रिय-आत्मन: विकाससाधनोपाया:, दीर्घायुप्राप्त्युपाया:, बाधकशक्तीनां निराकरणोपायाश्च विवेचितानि। स्वस्थजनानाम् आतुरजनानाञ्च समुचितमार्गप्रदर्शनविधायकं विज्ञानम् आयुर्विज्ञानम् । शास्त्रे अस्मिन् आयु शाखा, आयुविद्या, आयुसूत्रम्, आयुज्ञानम्, आयुलक्षणम्, आयुतन्त्रमादि विषया: चर्चिता: । उक्तञ्च चरकसंहितायाम् -

**हिताहितं सुखं दु:खमायुस्तस्य हिताहितम्।**

**मानं च तच्च यत्रोक्तमायुर्वेद: स उच्यते**। (चरकसंहिता 1.40)

अत्रि-भारद्वाज-चरक-सुश्रुत-काश्यपादय: अस्य प्रवर्त्तका: । आर्युवेदस्याचार्या: - अश्विनीकुमार-धन्वन्तरी-काशिराज-नकुल-सहदेव-अर्कि-च्यवन-जनक-बुध- जावाल-जाजलि-पैल-करथ-अगस्त्यादय: । आयुर्वेदस्य अष्टविभागा: सन्ति । एते तन्त्र नाम्ना परिचिता: । अष्टाङ्ग वैद्यकमिति नामान्तरम् । यथा -

शल्यतन्त्रम् - शल्यक्रिया

शालकतन्त्रम् - कर्णनासिकाकंठ

कायचिकित्सा - सामान्य -

भूतविद्यातन्त्रम् - मनचिकित्सा

कौमारभृत्यम् - वालचिकित्सा

अगदतन्त्रम् - विषविज्ञानम्

रसायनतन्त्रम् - Chemical/ Chemistry

वाजीकरणतन्त्रम् -कामोद्दीपकतन्त्रम् ।

1. **शल्यतन्त्रम्** (Surgery and Midwifery) – शरीरे शल्यचिकित्सा सम्पादनाय अग्नि-क्षार-यन्त्र-शस्त्रादीनां प्रयोगं क्रियते । तत्रोक्तं शल्यं नाम -

**विविधतृणकाष्ठपाषाणपांशुलोहलोष्ठस्थिवालनश्वपूयस्रावद्रष्ट्वाणां**

**तर्गर्भशल्योद्धरणार्थ यन्त्रशस्त्रक्षाराग्निप्रणिधान्व्राण विनिश्चयार्थ च ।।**

2. **शालक्यतन्त्रम्** (Opthamology including ENT and Dentistry) -
शालकासदृशयन्त्रणां तन्त्राणां वा प्रयोग: यस्मिन् अङ्गे क्रियते, तानि अङ्गानि यथा मुख- नासिका-नेत्र-कर्णादीनां चिकित्साशास्त्रं तन्त्रं वा शालक्यतन्त्रमिति । ऊर्ध्वाङ्गचिकित्सा इति अपर नाम। यदुक्तम् -

**शालाक्यं नाम ऊर्ध्वजन्तुगतानां श्रवण-नयन-वदन-घ्राणादि संश्रितानां व्याधीनामुपशमनार्थम् (सु.सं. 1.2)**

3. **कायचिकित्सातन्त्रम्** - (सामान्यम्) - ज्वर-रक्त-पित्त-उन्नाद-तृष्णा-आपस्मर-कुष्ठ-प्रमेह-अविसारादि रोगचिकित्सा अन्तर्गता: एते । शास्त्रकारै: उक्तम् - **कायचिकित्सा नाम सर्वाङ्ग संश्रितानां व्याधीनां ज्वररक्तपित्तशोषोन्मादापस्मारकुष्ठमेहातिसारादीनामुपशमनार्थम् ।**

4. **भूतविद्यातन्त्रम्** -अस्य ग्रहचिकित्सा इति नामान्तरम्। अत्र देवाधिग्रहाणां प्रभावेण उत्पन्नानां विकाराणां चिकित्सा क्रियते। तन्त्रे अस्मिन् शान्तिकर्मविधानमपि चर्चितम्। चरकसंहितायां अस्योपलब्धि: प्राप्यते। यथा -

**भूतविद्यानाम देवासुरगंधर्वयक्षरक्ष:**

**पितृपिशाचनागग्रहमुपसृष्ट**

**चेतसांशान्तिकर्म वलिहरणादिग्रहोपशमनार्थम् ।। (सु.सू.1.4)**

5. **कौमारभृत्यम्** - (Pediatrics) – बालतन्त्रमिति नामान्तरम् । वालकानां, स्त्रीणाञ्च गर्भविज्ञावसम्बन्धीया चर्च्चा अत्र वर्त्तते। काश्यपसंहिता नामक पुस्तके वर्णितानि एतानि तथ्यानि यत् तु खण्डश: प्राप्यते। यथा -

**कौमारभृत्यं नाम कुमारभरण धात्रीक्षीरदोषश् संशोधनार्थं**

**दुष्टस्तन्यग्रहसमुत्थानां च व्याधीनामुपशमनार्थम् ।। (सु.सू. 1.5)**

6. **अगदतन्त्रम्** - सर्पादि द्वारा कृत्रिमविषादीनां लक्षण-चिकित्साविषये वर्णितं तन्त्रम् । दंष्ट्राविषचिकित्सा इति नामान्तरम् । यदुक्तम -

**अगदतन्त्रं नाम सर्पकीटलतामषिकादिदष्टविष व्यंजानार्थं विविधविषयंयोगोपशमनार्थं च** ।। (सु.सू. 1.6)

7. **रसायनतन्त्रम्** -उत्तमस्वास्थ्य-बल-पौरष-दीर्घायु च भवितुं तथा वृद्धावस्थावशात् उत्पन्नानां विकाराणां दूरीकरणोपाया: वर्णिता: अत्र । यथा -

**रसायनतन्त्र नाम वय: स्थापलमायुमेधावलकरं**

**रोगापहरणसमर्थं च ।। (सु. सू. 1.7)**

8. **वाजीकरणतन्त्रम्** - कामोद्दीपकतन्त्रमिति अस्य अपर नाम। यथा -

**वाजीकरणतन्त्रं नाम अल्पदुष्ट क्षीणविशुष्करेतसामाप्यायन**

**प्रसादोपचय जननिमित्तं प्रहर्षं जननार्थं च ।। (सु.सू.1.8)**

आयुर्वेदस्य प्रयोजनद्वयमपि चरकसंहितायां प्रतिपादितम् । तद्यथा -

**प्रयोजनं चास्य स्वस्थस्य स्वास्थरक्षणम्**

**आतुरस्य विकार प्रशमनञ्च** ।। (सूत्रस्थानम् 30.26)

अस्यार्थ: स्वस्थमानवस्य रक्षणम्, आतुरस्य विकारप्रशमनञ्च । सुश्रुतेन स्वस्थमानवस्य लक्षणविषये उक्तम् -

**समदोष:समाग्निश्च समधातुमलक्रिय: ।**

**प्रसन्नात्मोन्द्रियमना: स्वस्थ इत्यभिधीयते ।।**

चरकसंहितायां रोग-निरोगलक्षणानां विषये चर्चा वर्त्तते। वात्त-पित्त-कफदोषाणां सममात्रायामुपस्थिति: आरोग्यमिति, एतेषु विषमता रोगमिति। अत: मानवस्य स्वास्थ्यसंरक्षणोपाया: आयुर्वेदे एवं प्रतिपादितानि । यथा–

क. शास्त्रोक्तदिनचर्या-रात्रिचर्या-ऋतुचर्यानियमानां पालनम् ।
ख. विवेकपूर्णकार्यसम्पादनम् ।
ग. मन-इन्द्रियाणां नियन्त्रणम् ।
घ. मल-मूत्रादीनामवरोध: न करणीय: ।
ङ. ईर्षा-द्वेष-लोभ-अहंकारभावनाया: परित्याग: ।
च. जल-वायु-कालप्रभावेण उत्पन्नानां रोगाणां नियन्त्रणाय विज्ञे: चिकित्सकै: प्रदत्तानामुपदेशानां पालनम् ।
छ. रोगप्रतिरोधकक्षमताया: वर्धनम् ।
ज. जीवने सामञ्जस्यं सन्तुलनञ्च सृजनीयम् ।
झ. शरीरत: विषयुक्तपदार्थानाम् अशुद्धीनाञ्च दूरीकरणे सहायता प्रदानम् ।
ञ. विषादस्य न्यूनीकरणम्
ट. आन्तरिकशुद्धीकरणम्
ठ. विशिष्टा आहारव्यवस्था
ड. वनस्पति औषधानामुपयोग:

ढ. योग:

ण. ध्यानमादय:

आतुरस्य विकारप्रशमनञ्च-आयुर्वेदे आतुरजनस्य रोगदूरीकरणाय त्रीणि उपायानि प्रतिपादितानि, यानि त्रिसन्धमिति कथ्यते । यथा -

क. हेतु: - रोगस्य कारणम्,

ख. लिङ्गम् - रोगपरिचायकविषयाणां ज्ञानम् ( अत्र त्रीणि पादानि सन्ति यथा -पूर्वरूप, सम्प्राप्ति:, उपशमश्च)

ग. औषधम् - आवश्यकतानुगुणम्

आयुर्वेदिकचिकित्साविधि: सर्वोत्कृष्ट: भवति। अनेन मानवस्य शारीरिक-मानसिकस्थितिषु सुधार: जायते। पुनश्च अत्र आयुर्वेदीयचिकित्साया: दुष्प्रभाव: नास्ति। आयुर्वेदे तीक्ष्ण-तृषा-तन्द्रा-निदान-अग्नि-पञ्चकर्म-पञ्चमूलधातु- वातकारक-पथ्य-वाजीकरण-शमन-हेतु-त्रिदोष-त्रिगुणादिपदानां प्रयोग: बहुलतया जायते। एवंरूपेण न केवल आर्युवेदीयग्रन्थेषु अपितु सम्पूर्णे संस्कृतसाहित्ये करणीय-अकरणीयकार्याणां विवरणमस्ति। भारतीयसंस्कृतौ सदाचार: धर्मेण स्वास्थ्येन साकं सम्बन्धित:। अत: शारीरिक-मानसिकरूपेण च स्वस्थजीवनं यापयितुं शास्त्रोक्तनियमानाम् अनुपालनं करणीयमिति शम्।

सन्दर्भग्रन्थसूचय: -


1. http://www.ancient.eu/sanskrit/
2. राजाराधाकान्तदेव, शब्दकल्पद्रुम - वाराणासी -3rd volume, Page No- **431**
3. Madhusudan Mishra, An introduction of Sanskrit, Edition -**2006**, Parimal Publication, Delhi
4. संस्कृतसाहित्येतिहास: - ओडिया - हरेकृष्णशतपथी